श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनरसिंहाचार्यस्वामी विरचितम्

# ॥ श्रीतोयाद्रिरङ्गनाथमङ्गळाशासनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीतोयाद्रिरङ्गनाथमङ्गळाशासनम् ॥

श्रीभूमिनायिकाचित्तपद्मसमाधिवासिने।
जलशैलनिवासाय रङ्गनाथाय मङ्गलम् ॥ 1 ॥

सर्वाङ्गमैकसेव्याय भव्याय परमात्मने।
तोयशैलनिवासाय रङ्गनाथाय मङ्गलम् ॥ 2 ॥

कृपासिन्धुसमुद्भूतपङ्कजायतचक्षुषे।
रङ्ग ! ते मङ्गलं भूयात् लक्ष्मीलक्षितवक्षसे ॥ 3 ॥

तापत्रयनिमग्नानां भुग्नानां भवभारतः।
रक्षणे दीक्षितायास्तु रङ्गनाथाय मङ्गलम् ॥ 4 ॥

मङ्गलम् लोकनाथाय मङ्गलम् परमात्मने।
मङ्गलं श्रुतिगम्याय मङ्गलं रङ्गनाथ ते ॥ 5 ॥

अशेषदुःखसंहर्त्रे भर्त्रे कर्त्रे च शश्वते।
मङ्गलं रङ्गनाथाय जगन्मङ्गलमूर्तये ॥ 6 ॥

शेषभोगीन्द्रसंश्लिष्टचन्दनद्रुमरूपिणे।
मङ्गलं सर्वगन्धाय रङ्गनाथाय शेषिणे ॥ 7 ॥

योगनिद्राभिरामाभ्यां नेत्राभ्यां जगतां सदा।
संमोहनाय नाथाय रङ्गनाथाय मङ्गलम् ॥ 8 ॥

श्रीमन्नारायणाभिख्यमुनिमानसवासिने।
तोयशैलनिवासाय रङ्गनाथाय मङ्गलम् ॥ 9 ॥

श्रीवत्सगोत्रसञ्जातनृसिंहाचार्यरक्षिणे।
श्रीतोयशैलनाथाय रङ्गनाथाय मङ्गलम्॥ **10**॥

मङ्गलाशासनपरैः मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम्॥ **11**॥

॥ इति श्रीतोयाद्रिरङ्गनाथमङ्गळाशासनं समाप्तम्॥